इति स्त्रीमात्रस्य प्रकृत्यंशतया प्रकृतिवाचकशब्दस्यैव प्राग्नुत्कीर्त्यत्वं निर्णीतं यथा ।
"आदौ राधां समुच्चार्य्य पश्चात् कृष्णं विदुर्बुधाः। निमित्तमस्य मां भक्त वद भक्तजनप्रिय !" श्रीनारायण उवाच "निमित्तमस्य विविधं कथयामि निशामय । जगन्माता च प्रकृतिः पुरुषश्च जगत्पिता । गरीयसीति जगतां माता शतगुणैः पितुः । राधाकृष्णेति गौरीशेत्येवं शब्दः श्रुतौ श्रुतः । कृष्णराधेशगौरीति लोके न च कदा श्रुतः । प्रसीद रोहिणीचन्द्र ! गृहाणार्घ्यमिदं मम । गृहाणार्घ्यं मया दत्तं संज्ञया सह भास्कर ! । प्रसीद कमलाकान्त ! गृहाण मम पूजनम् । इति दृष्टं सामवेदे कौथुमे मुनिसत्तम ! । राशब्दोच्चारणादेव स्फीतो भवति माधवः । धाशब्दोच्चारतः पश्चाद्धावत्येव ससम्भ्रमः । आदौ पुरुषमुच्चार्य्य पश्चात् प्रकृतिमुच्चरेत् । स भवेन्मातृगामी च वेदातिक्रमणे मुने !" ब्रह्मवै॰पु॰जन्मख॰५॰अ॰।

**प्रकृतिज** त्रि॰प्रकृत्या जायते जन–ड । १स्वभावजे । प्रकृतिरूपेण जायते जन–ड । प्रकृतिस्वभावरूपे सांख्यमतसिद्धे सत्त्वादिगुणे "गुणाः प्रकृतिजास्मृताः" गीता ।

**प्रकृतिधर्म** पु॰ ६त॰ । सांख्यमतसिद्धे प्रकृतिधर्मभेदे स च प्रकृतिशब्दे हेतुमदनित्यादिविपरीतधर्मरूपेण दर्शितः । सुश्रुते तु "अत ऊर्द्ध्वं प्रकृतिपुरुषयोः साधर्म्यवैधर्म्ये व्याख्यास्यामः । तद्यथा "उभावप्यनादी उभावप्यनन्तौ उभावप्यलिङ्गौ उभावपि नित्यौ उभावप्यपरौ उभौ च सर्वगतावितिति । एका तु प्रकृतिरचेतना त्रिगुणा बीजधर्मिणी प्रसवधर्मिण्यमध्यस्थधर्मिणी चेति । बहवस्तु पुरुषाश्चेतनावन्तोऽगुणा अबीजधर्मिणोऽप्रसवधर्मिणो मध्यस्थधर्मिणश्चेति" ।

**प्रकृतिमण्डल** न॰ ६त॰ । १राज्याङ्गेषु स्वाम्यमात्यादिषु २प्रजासमुदाये च रघुः ८।२ श्लोकव्या॰ मल्लिनाथः ।

**प्रकृतिवत्** अव्य॰प्रकृत्या तुल्यम् प्रकृति+वति । व्याकरणप्रसिद्धे आदिश्यमानस्य प्रकृतिभूतस्यानितुल्यकार्य्ये ।

**प्रकृत्यादि** पु॰ प्रकृतिशब्द आदिर्यस्य । सर्वविभक्त्यपवाद तृतीयानिमित्ते शब्दगणे स च गणः "प्रकृति प्राय गोत्र सम विषम द्विद्रोण पञ्चक साहस्र" । प्रकृत्या प्रायेण याज्ञिकः इत्यादि । आकृतिगणोऽयम् । तेन नाम्ना सुतीक्ष्णइत्युदीरितेन दान्तः" भट्टिः इत्यादि ।

**प्रकृष्ट** त्रि॰ प्र+कृष–क्त । उत्कर्षयुक्ते हेमच॰ ।

**प्रकृष्य** त्रि॰ प्र+कृष–कर्मणि क्यप् । भूमिसंलग्नतया कर्षणीये "उलूखलबुध्नो यूपः प्रकृष्यः" कात्या॰श्रौ॰ २४।५।२७। प्रकृष्यः देशान्तरनयनेन प्रकर्षणीयः भूमिसंलग्नतया प्रेरणीयो न तु उत्पाटनेनेति तदर्थः ।

**प्रकॢप्ति** स्त्री प्र+कृप–भावे क्तिन् । उपक्लृप्तौ विद्यमानतायां कात्या॰ १।८।२२

**प्रकेत** त्रि॰ प्र+कित-णिच्–अच् । १प्रकर्षेण ज्ञापके ऋ॰१। ११३।१भा॰। प्रकर्षेण कं सुखमीयतेऽनेन प्र–ई–बा॰करणे क्त । २प्रकृष्टसुखसाधने यजु॰ १५।६॰वेददीपः ।

**प्रकोथ** पु॰ प्र+कुथ–पतितत्वे भावे घञ् । १प्रकृष्टपतने २संशोषे च "शीघ्रं स्तनो हि मृदुमांसतयोपनद्धः सर्वं प्रकोथमुपयात्यवदीर्य्यते च" सुश्रुतः ।

**प्रकोष्ठ** पु॰ प्रगतः कोष्ठं प्रा॰स॰ । कूर्परस्याधोभागस्थे मणिबन्धपर्यन्ते १हस्तावयवे २गृहद्वारपिण्डे च अमरः । गृहाभ्यन्तरप्रदेशभेदे मुकुटः ।

**प्रख(च)र** पु॰ प्रखर+पृषो॰प्र+चर अच् वा । १अश्वसन्नाहे शब्दमाला तत्र द्विधा पाठः । २कुक्कुरे ३अश्वतरे च ४अत्यन्ततीक्ष्णे त्रि॰ मेदि॰ ।

**प्रक्रम** पु॰ प्र+क्रम–भावे घञ् । १उपक्रमे अमरः २प्रथमारम्भे ३अवसरे मेदि॰ भग्नप्रक्रमः काव्यदोषभेदः । भावे ल्युट् । प्रक्रमण–तत्रार्थे प्रकर्षेण क्रमणे न॰ ।

**प्रक्रान्त** त्रि॰ प्र+क्रम–क्त । १आरब्धे २प्रकरणप्राप्ते

**प्रक्रिया** स्त्री प्र+कृ–भावे श । १प्रकरणे "सा प्रक्रिया या कथमित्यपेक्षा" पार्थसारथिमिश्रः । २अधिकारे नृपादीनां चामरव्यजनच्छत्रधारणादिव्यापारे च ३शब्दप्रयोगसाधनावस्थायाम् ४पक्षप्रतिपक्षयोः प्रवृत्तौ गौतमसू॰ ५।१।१६ शबरभा॰ । [युक्ते त्रि॰ ।

**प्रक्लिन्न** त्रि॰ प्र+क्लिद–कर्त्तरि क्त । १तृप्ते जटा॰ २बह्वार्द्र-

**प्रक्व(क्वा)ण** पु॰ प्र+क्वण–भावे घञ् अप् वा । वीणादेः क्वणिते शब्दे अमरः ।

**प्रक्षाल** त्रि॰ प्रक्षालयति क्षालि-अच् । शोधके प्रायश्चित्ते न॰ "परिष्टिका वैधनिकास्त्वप्रक्षालास्तथैव च" (यतयः) भा॰ आश्व॰ ६२अ॰ । "अप्रक्षालाः ( निष्पापतया ) शोधकहीनाः" नीलकण्ठः । अत्र मुद्रितपुस्तके "परिष्टिका वैद्यविकास्त्वप्रख्याजास्तथैव च" इत्यपपाठः ।

**प्रक्षेप** पु॰प्र+क्षिप–भावे घञ् । १अर्पणे २बहुद्रव्यमध्ये अपराल्पांशनिवेशने च ।

**प्रक्ष्वेडन** पु॰ प्र+क्ष्विड–ल्यु । नाराचास्त्रे हेमच॰ ।

**प्रख्या** स्त्री प्र+ख्या–भावे अङ् । १विख्यातौ २उपमायां च